भिक्षाकः, पुं, ( भिक्षते इति । भिक्ष+"जल्पभिक्षकुट्टलुण्टवृङः षाकन् ।" ३ । २।१५५। इति षाकन् । ) भिक्षुकः । इति सिद्धान्तकौमुदी ॥

भिक्षाकी, स्त्री, ( भिक्षाक+षित्वात् ङीष् । ) भिक्षुकी । इति मुग्धबोधव्याकरणम् ॥

भिक्षाचरः, पुं.स्त्री, (भिक्षां चरतीति । भिक्षा+चर+"भिक्षासेनादायेषु च ।" ३।२।१७। इति टः । ) भिक्षुकः । इति सिद्धान्तकौमुदी ॥ ( स्वनामख्यातो भोजनरपतेः पुत्रः । यथा, राजतरङ्गिण्याम् । ८ । १७ ।
"राज्ञां विभवमत्यां यं भोजो हर्षनृपात्मजः ।
बालं व्यतद्भिर्विपुत्रानन्तरं गुरुभिः शिशुम् ।
आयुष्कामैस्तमाङ्काख्यभिक्षाचराभिधम् ॥")

भिक्षाटनं, क्ली, ( भिक्षार्थमटनं गमनम् । ) भिक्षार्थभ्रमणम् । यथा,—
"अर्द्धं दानववैरिणा गिरिजयाप्यर्द्धं हरस्याहृतं
देवेत्थं जगतीतले स्मरहराभावः समुन्मीलति ।
गङ्गा सागरमम्बरं शशिकला नागाधिपः
क्ष्मातलं
सर्व्वज्ञत्वमधीश्वरत्वमगमत् त्वां माच भिक्षाटनम् ॥"
इत्युद्भटः ॥

भिक्षाशित्वं, क्ली, (भिक्षाशिनो भिक्षुकस्य भावः । भिक्षाशिन्+त्व । ) पैशुन्यम् । इति हारावली ॥

भिक्षाशी, [न्] त्रि, (भिक्षां अश्नातीति । अश+णिनिः ।) भिक्षुकः । इत्युणादिकोषः ॥ यथा,—
"भिक्षाशी विचरेद्ग्रामं वन्यैर्यदि न जीवति ॥"
इति प्रायश्चित्तविवेकः ॥

भिक्षुः, पुं, ( भिक्षणशीलः । भिक्ष याचने+"सनाशंसभिक्ष उः ।" ३।२।१६८। इति उः ।) ब्रह्मचार्य्याद्याश्रमचतुष्टयान्तर्गतचतुर्थाश्रमी । आश्रमशब्दोऽयं धर्म्मिपरो धर्म्मपरश्च । इति भरतः । तत्पर्य्यायः । परिव्राट् २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५ इत्यमरः ।२।७।४२। परिव्राजकः ६ पराशरी ७ श्रमणः ८ । इति शब्दरत्नावली ॥ तस्य धर्म्मो यथा,—
"भिक्षोर्धर्म्मं प्रवक्ष्यामि तन्निबोधत सत्तमाः ।
समादृत्याज्ञा सर्व्वेष्टिं सर्व्ववेदसदक्षिणाम् ॥
प्राजापत्यां तदन्ते तु अग्निमारोप्य चात्मनि ।
सर्व्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः ॥
सर्व्वारामं परित्यज्य भिक्षार्थी ग्राममाश्रयेत् ।
अप्रमत्तश्चरेद्भैक्ष्यं सायाह्ने नातिलक्षितः ॥
रहिते भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः ।
भवेत् परमहंसो वा एकदण्डी यमादिकृत् ॥
सिद्धयोगस्त्यजन् देहममृतत्वमिहाप्नुयात् ।
योगमभ्यस्य मितभुक् परां सिद्धिमवाप्नुयात् ॥
दातातिथिप्रियो ज्ञानी गृही श्राद्धेऽपि मुच्यते ।"
इति गारुडे १०३ अध्यायः ॥ * ॥
अपि च ।
"चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः ।
तस्य स्वरूपं गदतो मम श्रोतुं नृपार्हसि ॥
पुत्त्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप ! ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्द्धूतमत्सरः ॥
त्रैवर्णिकांस्त्यजेत् सर्व्वानारम्भानवनीपते ! ।
मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥
जरायुजाण्डजादीनां वाङ्मनःकर्म्मभिः क्वचित् ।
युक्तः कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्जयेत् ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिष्ठेद्यथा प्रीतिर्द्वेषो वा नास्य जायते ॥
प्राणयात्रानिमित्तञ्च व्यङ्गारे भुक्तवज्जने ।
काले प्रशस्तवर्णानां भिक्षार्थं पर्य्यटेद्गृहान् ॥
कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये ।
तांस्तु दोषान् परित्यज्य परिव्राण्निर्म्ममो भवेत् ॥
अभयं सर्व्वसत्त्वेभ्यो दत्त्वा यश्चरते मुनिः ।
न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥
कृत्वाग्निहोत्रं स्वशरीरसंस्थं
शारीरमग्निञ्च मुखे जुहोति ।
विप्रस्तु भैक्षोपगतैर्हविर्भि-
श्चिताग्निना स व्रजति स्म लोकान् ॥
मोक्षाश्रमं यश्चरते यथोक्तं
शुचिः सुसङ्कल्पितबुद्धियुक्तिः ।
अनिन्धनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं श्रयति द्विजातिः ॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः ॥ * ॥
बुद्धभेदः । इति जटाधरः ॥ श्रावणीक्षुपः । इति राजनिर्घण्टः ॥ कोकिलाक्षः । इति भावप्रकाशः ॥

भिक्षुकः, पुं, स्त्री, ( भिक्षुरेव । भिक्षु+स्वार्थे कन् । यद्वा, भिक्षते इति । भिक्ष+उक । ) भिक्षोपजीवी । तत्पर्य्यायः । मार्गणः २ याचनकः ३ वनीयकः ४ याचकः ५ । इति जटाधरः ॥ अर्थी ६ । इत्यमरः ॥ ( यथा, मनुः । ३ । २४३ ।
"ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम् ।
ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ॥"
पारिभाषिकभिक्षुका यथा, अत्रिः ।
"ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः ।
अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ॥")

भिक्षुसंघाटी, स्त्री, ( भिक्षु संघटते इति । भिक्षु+सम्+घट+अण् । गौरादित्वात् ङीष् ।) चीवरम् । इति हेमचन्द्रः ॥ यथा, सुश्रुते उत्तरतन्त्रे ३३ अध्याये ।
"पुरीषं कौक्कुटं केशांश्चर्म्मसर्पत्वचस्तथा ।
जीर्णाञ्च भिक्षुसंघाटीं धूपनार्थोपकल्पयेत् ॥")

भिण्डः, पुं, (भण्यते इति । भण्+डः । पृषोदरादित्वात् साधुः । ) भिण्डाक्षुपः । इति राजनिर्घण्टः ॥

भिण्डकः, ( भिण्ड । स्वार्थे कन् । ) भिण्डाक्षुपः । इति राजनिर्घण्टः ॥

भिण्डा, स्त्री, ( भिण्ड+अजादित्वात् टाप् । ) क्षुपविशेषः । भिण्डी इति ख्याता । तत्पर्य्यायः । भिण्डीतकः २ भिण्डः ३ भिण्डकः ४ क्षेत्रसम्भवः ५ चतुष्पदः ६ चतुःपुण्ड्रः ७ सुशाकः ८ अस्रपत्रकः ९ करपर्णः १० वृत्तबीजः ११ । अस्या गुणाः । अम्लरसत्वम् । उष्णत्वम् । ग्राहित्वम् । रुचिकरत्वञ्च । इति राजनिर्घण्टः ॥

भिण्डीतकः, पुं, ( भिण्डी सती तकति हसतीति । तक्+अच् । ) भिण्डाक्षुपः । इति राजनिर्घण्टः ॥

भित्तं, क्ली, (भिद्यते स्मेति । भिद्+क्तः । "भित्तं शकलम् ।" ८ । २ । ५९ । इति निष्ठातकारस्य नत्वाभावो निपात्यते । ) खण्डम् । इत्यमरः । १ । ३ । १६ ॥

भित्तिः, स्त्री, ( भिद्यते इति । भिद्+क्तिन् । ) गृहादेर्मृदिष्टकादिमयी वृतिः । कोँथ इति भित् इति च ख्याता । तत्पर्य्यायः । कुड्यम् २ । इत्यमरः । २ । २ । ४ ॥ भित्तिका ३ कुड्यम् ४ कुड्यकम् ५ । इति शब्दरत्नावली ॥ ( यथा, विश्वकर्म्मप्रकाशे । पञ्चमाध्याये ।
"मानेनानेन विस्तारो भित्तीनान्तु विधीयते ।
पादे पञ्चगुणं कृत्वा भित्तीनामुच्छ्रयो भवेत् ॥")
प्रभेदः । सम्विभागः । अवकाशः । इति विश्वः । प्रदेशः । इति शब्दरत्नावली ॥ ( यथा, रघौ । ५ । ४३ ।
"अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः
प्राक् सूचितान्तःसलिलप्रवेशः ।
निर्धौतदानामलगण्डभित्तिः
वन्यः सरित्तो गज उन्ममज्ज ॥" )

भित्तिका, स्त्री, ( भिद्यते भिनत्ति वेति । भिदिर् विदारणे+"हृतिभिदिक्षितिभ्यः कित् ।" उणा० ३ । १४७ । इति तिकन् । कित् स्यात् ।) कुड्यम् । इति शब्दरत्नावली ॥ पल्ली । इति हेमचन्द्रः ॥

भित्तिचौरः, पुं, ( चोरयतीति । चुर+अच् । चोर एव स्वार्थे अण् । चौरः । भित्त्या कुड्यादिभेदेन चौरः । ) चौरविशेषः । सिँदाल चोर इति भाषा । तत्पर्य्यायः । खानिकः २ कुड्यच्छित् ३ । इति शब्दरत्नावली ॥

भित्तिपातनः, पुं, ( पातयतीति । पत+णिच् । कर्त्तरि ल्यु । भित्तीनां पातनः ।) महामूषकः । इति राजनिर्घण्टः ॥

भित्, [ द् ] स्त्री, ( भिद्यते इति । भिद्+"सत्सूद्विषद्रुहदुहयुजविदभिदेति ।" ३ । २ । ६१ । इति क्विप् । ) प्रभेदः । इति जटाधरः ॥ ( भिनत्तीति । भिद्+तच्छीलादिषु "अन्येभ्योऽपि दृश्यते ।" इति क्विप् । ) भेदकर्त्तरि त्रि ॥ ( यथा, ऋग्वेदे । ७ । १७४ । ८ ।
"भिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य पीयोः ॥")

भिद इर् औ ञ ध भिदि । इति कविकल्पद्रुमः ॥ ( रुधा०-उभ०-सक०-अनिट् । ) भित् कियदवयवविदारणम् । ञ ध भिनत्ति भिन्ते कूलं नदी । औ भेत्ता । इर् अभिदत् अभैत्सीत् । इति दुर्गादासः ॥